# Ramadevikritam Kamadeva Stotram

# રમાદેવીકૃતં કામદેવસ્તોત્રમ્

## Document Information

Text title : Ramadevikritam Kamadeva Stotram

File name : ramAdevIkRRitaMkAmadevastotram.itx

Category : deities_misc, bhAgavatapurANa, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 5/18/18-23||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 23, 2025

*sanskritdocuments.org*

# રમાદેવીકૃતં કામદેવસ્તોત્રમ્

ॐ હ્રાં હ્રીં હ્રૂં ॐ નમો ભગવતે હૃષીકેશાય
સર્વગુણવિશેષૈર્વિલક્ષિતાત્મને આકૂતીનાં ચિત્તીનાં
ચેતસાં વિશેષાણાં ચાધિપતયે ષોડશકલાય
ચ્છન્દોમયાયાન્નમયાયામૃતમયાય સર્વમયાય
સહસે ઓજસે બલાય કાન્તાય કામાય નમસ્તે
ઉભયત્ર ભૂયાત્ ॥ ૧૮॥

સ્ત્રિયો વ્રતૈસ્ત્વા હૃષીકેશ્વરં સ્વતો
હ્યારાધ્ય લોકે પતિમાશાસતેઽન્યમ્ ।
તાસાં ન તે વૈ પરિપાન્ત્યપત્યં
પ્રિયં ધનાયૂંષિ યતોઽસ્વતન્ત્રાઃ ॥ ૧૯॥

સ વૈ પતિઃ સ્યાદકુતોભયઃ સ્વયં
સમન્તતઃ પાતિ ભયાતુરં જનમ્ ।
સ એક એવેતરથા મિથો ભયં
નૈવાત્મલાભાદધિ મન્યતે પરમ્ ॥ ૨૦॥

યા તસ્ય તે પાદસરોરુહાર્હણં
નિકામયેત્સાખિલકામલમ્પટા ।
તદેવ રાસીપ્સિતમીપ્સિતોઽર્ચિતો
યદ્ભગ્નયાચ્ઞા ભગવન્ પ્રતપ્યતે ॥ ૨૧॥

મત્પ્રાપ્તયેઽજેશસુરાસુરાદય-
સ્તપ્યન્ત ઉગ્રં તપ ઐન્દ્રિયે ધિયઃ ।
ઋતે ભવત્પાદપરાયણાન્ન માં
વિન્દન્ત્યહં ત્વદ્ધૃદયા યતોઽજિત ॥ ૨૨॥

સ ત્વં મમાપ્યચ્યુત શીર્ષ્ણિ વન્દિતં
કરામ્બુજં યત્ત્વદધાયિ સાત્વતામ્ ।

બિભર્ષિ માં લક્ષ્મ વરેણ્ય માયયા
ક ઈશ્વરસ્યેહિતમૂહિતું વિભુરિતિ ॥ ૨૩॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે પઞ્ચમસ્કન્ધે અષ્ટાદશાધ્યાયાન્તર્ગતં
રમાદેવીકૃતં કામદેવસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૫/૧૮/૧૮-૨૩॥

bhAgavatapurANa . adhyAya 5/18/18-23..

Proofread by PSA Easwaran

*Ramadevikritam Kamadeva Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*